पञ्चकं फाल्गुनः प्रोक्तं तदेकादशसत्तमम् ॥
पादौ यकारो मीनो हि स चैत्रे वसते मुने ! ।
इदन्तु द्वादशं प्रोक्तं पत्रं वै केशवस्य हि ॥
द्वादशारन्तथा चक्रं यन्नाभिद्विगुणन्तथा ।
त्रिव्यूहन्त्वेकमूर्त्तिश्च तथोक्तः परमेश्वरः ॥
एतत्तवोक्तं देवस्य रूपं द्वादशपत्रकम् ।
यस्मिन् ज्ञाते मुनिश्रेष्ठ ! न भूयो मरणं भवेत् ॥”
इति वामनपुराणेऽष्टपञ्चाशत्तमोऽध्यायः ॥

द्वादशलोचनः, पुं, (द्वादश लोचनानि नेत्राणि यस्य । षडाननत्वादेवास्य तथात्वम् ।) कार्त्तिकेयः । इति त्रिकाण्डशेषः ॥

द्वादशांशुः, पुं, (द्वादश अंशवः किरणानि यस्य ।) बृहस्पतिः । इति भूरिप्रयोगः ॥ (यदुक्तं मात्स्ये । १२७ । ५५ ।
“लोहितो नवरश्मिस्तु स्थानमापन्न तस्य वै ।
बृहत् द्वादशरश्मीकं हरिद्राभन्तु वेधसः ॥”)

द्वादशाक्षः, पुं, (द्वादश अक्षीणि यस्य ।) कार्त्तिकेयः । (द्वादशविषयेषु अक्षिणी यस्य ।) बुद्धः । इति हेमचन्द्रः । २ । १४८ ॥ (कार्त्तिकेयस्य अनुचरविशेषः । यथा, महाभारते । ९।४५।५६ ।
“एकाक्षो द्वादशाक्षश्च तथैवैकजटः प्रभुः ॥”)

द्वादशाक्षरमन्त्रः, पुं, (द्वादश अक्षराणि यस्य । तादृशो मन्त्रः ।) द्वादशवर्णात्मकविष्णुविषयकमन्त्रविशेषः । यथा,—
“नमो भगवते वासुदेवायोङ्कारपूर्व्वकम् ।
महामन्त्रमिमं प्राहुस्तत्त्वज्ञा द्वादशाक्षरम् ॥”
इति पाद्मे क्रियायोगसारः ॥

द्वादशाख्यः, पुं, (द्वादश ज्ञानकर्म्मादिविषयान् आख्यातीति । ख्या कथने+कः ।) बुद्धः । इति त्रिकाण्डशेषः ॥

द्वादशाङ्गुलः, पुं, (द्वादश अङ्गुलयः परिमाणमस्य । “तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ।”५ । ४ । ८६ . इति अच् ।) वितस्तिः । इत्यमरः । २ । ६ । ८४ ॥

द्वादशात्मा, [न्] पुं, (द्वादश आत्मानो मूर्त्तयो यस्य ।) सूर्य्यः । (यथा, महाभारते ।३।३।२६।
“द्वादशात्मारविन्दाक्षः पिता माता पितामहः ॥”)
अर्कवृक्षः । इत्यमरः ॥

द्वादशायुः, [स्] पुं, (द्वादशवर्षपर्य्यन्तं आयुर्यस्य ।) कुक्कुरः । इति शब्दमाला ॥

द्वादशार्चिः, [स्] पुं, (द्वादश अर्च्चींषि किरणानि यस्य ।) बृहस्पतिः । इति हेमचन्द्रः । २ । ३२ ॥

द्वादशी, स्त्री, (द्वादश+टित्वात् ङीप् ।) तिथिविशेषः । सा चन्द्रस्य द्वादशकलाक्रियारूपा । सा च विष्णुतिथिः । यथा,—
“त्रैलोक्यगामिनी देवी लक्ष्मीस्तेऽस्तु सदा प्रिया ।
द्वादशी च तिथिस्तेऽस्तु कामरूपी च जायते ॥
व्रताशनो भवेद्यस्तु द्वादश्यां तत्परायणः ।
स्वर्गगामी स भवतु पुमान् स्त्री वा विशेषतः ॥”
मार्गशीर्षीया शुक्लद्वादशी मत्स्यद्वादशी १ पौषी कूर्म्मद्वादशी २ माघी वराहद्वादशी ३ फाल्गुनी नृसिंहद्वादशी ४ चैत्री वामनद्वादशी ५ वैशाखी जामदग्न्यद्वादशी ६ ज्यैष्ठी रामद्वादशी ७ आषाढ़ी कृष्णद्वादशी ८ श्रावणी बुद्धद्वादशी ९ भाद्री कल्किद्वादशी १० आश्विनी पद्मनाभद्वादशी ११ कार्त्तिकी नारायणद्वादशी १२ । एतासां नाम धरणीव्रतम् । एतत्करणे महाफलम् । इति वराहपुराणम् ॥

अथ पिपीतकद्वादशी । नारदीये ।
“वैशाखे शुक्लपक्षे तु द्वादशी वैष्णवी तिथिः ।
तस्यां शीतलतोयेन स्नापयेत् केशवं शुचिः ॥”
इयं पिपीतकद्वादशी । अत्र ।
“षष्ठीसमेता कर्त्तव्या सप्तमी नाष्टमीयुता ।
पतङ्गोपासनायेह षष्ठ्यामाहुरुपोषणम् ॥
एकादश्यां प्रकुर्व्वन्ति उपवासं मनीषिणः ।
उपासनाय द्वादश्यां विष्णोर्यद्वदियं तथा ॥”
इति भविष्यपुराणेन एकादश्युपवासानन्तरं द्वादश्यां विष्णूपासनाया उक्तत्वात् । अत्रापि तथा व्यवहरन्तीति नात्र युग्मादरः । द्वादशीव्रये तूपवासानन्तर्य्यं विनापि पूर्णेति । इयं पूर्व्ववचनोक्ता षष्ठीयुता सप्तमी ॥ आषाढ़ादिद्वादशीषु शयनादिकम् ॥ * ॥

अथ श्रवणद्वादशी ।
सा भाद्रशुक्लद्वादश्यामेव सम्भवति । “भविष्योत्तरे ।
‘द्वादशी श्रवणोपेता सर्व्वपापहरा तिथिः ।
बुधवारसमायुक्ता ततः शतगुणा भवेत् ।
तामुपोष्य समाप्नोति द्वादशद्वादशीफलम् ॥’
उभयदिने तल्लाभे तु एकादशीयुतैव ग्राह्या ।
‘द्वादशी च प्रकर्त्तव्या एकादश्यन्विता विभो ।
सदा कार्य्या च विद्वद्भिर्विष्णुभक्तैश्च मानवैः ॥’
इति स्कान्दात् ॥
यदा त्वेकादश्यामेव श्रवणा तदा तामुपवसेत् ।
तथा च नारदः ।
‘याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः ।
तास्वेव तद्व्रतं कुर्य्यात् श्रवणद्वादशीं विना ॥’
भविष्योत्तरेऽपि ।
‘एकादशी यदा तु स्यात् श्रवणेन समन्विता ।
विजया सा सदा प्रोक्ता भक्तानां विजयप्रदा ॥
तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
तावदेव न भोक्तव्यं यावन्नेकस्य संक्षयः ॥
विशेषेण महीपाल ! श्रवणं वर्द्धते यदि ।
तिथिक्षयेण भोक्तव्यं द्वादशीं नैव लङ्घयेत् ॥’
तिथिक्षयेण एकादशीतिथिक्षयेण भोक्तव्यं द्वादश्यां पारयेदित्यर्थः । अत्र हेतुर्द्वादशीमित्यादि । यदा त्वेकादश्युपवासदिने श्रवणं नास्ति परदिने द्वादश्यां श्रवणं तदोपवासद्वयमाह ब्रह्मवैवर्त्तः ।
‘एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
न चात्र विधिलोपः स्यादुभयोर्देवता हरिः ॥’
अत्र असमाप्ते व्रते पूर्व्वे नैव कुर्य्याद्व्रतान्तरमिति स्मृतेः ॥ पारणाकरणेन पूर्व्वोपवाससमाप्तावुपवासान्तरारम्भे विधिलोपो न भवेदित्यर्थः हेतुमाह उभयोरित्यादि । उभयोरुपवाससामर्थ्ये तु श्रवणद्वादश्येवोपोष्या । तथा च स्मृतिः ।
‘वरमेकादशीं भुक्त्वा द्वादशीं समुपोषयेत् ।
पूर्व्वोपवासजं पुण्यं सर्व्वं प्राप्नोत्यसंशयम् ॥
उपोष्य द्वादशीं पुण्यां विष्णुऋक्षेण संयुताम् ।
एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयम् ॥’
द्वादश्युपवासः काम्यः । तथा च मार्कण्डेयपुराणम् ।
‘द्वादश्यामुपवासेन शुद्धात्मा नृप ! सर्व्वशः ।
चक्रवर्त्तित्वमतुलं संप्राप्नोत्यतुलां श्रियम् ॥”
कार्त्तिकशुक्लद्वादशी मन्वन्तरा । “तथा च भविष्यमत्स्ययोः ।
‘आश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी तथा ।’
इत्यादिवचनात् ।” इति तिथितत्त्वम् ॥ * ॥
“अग्रहायणशुक्लद्वादशी अखण्डद्वादशी । तत्रोपोष्य विष्णुपदप्राप्तिकामोऽखण्डद्वादश्यां विष्णुं पूजयिष्ये इति संकल्प्य पञ्चगव्येन स्नापयित्वा यथाशक्त्युपचारेण संपूज्य यवव्रीहिपूर्णपात्रं गृहीत्वा ।
‘ॐ सप्तजन्मसु यत्किञ्चिन्मया खण्डव्रतं कृतम् ।
भगवंस्त्वत्प्रसादेन तदखण्डमिहास्तु मे ॥
यथा खण्डं जगत् सर्व्वं त्वमेव पुरुषोत्तम ! ।
ततोऽखिलान्यखण्डानि व्रतानि मम सन्तु वै ॥’
इति प्रार्थ्य दक्षिणां दद्यात् ।” इति कृत्यचन्द्रिका ॥
भैमीपरद्वादश्यां षट्तिलाचरणम् । यथा विष्णुधर्म्मोत्तरे ।
“मृगशीर्षे शशधरे माघे मासि प्रजापते ! ।
एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः ।
द्वादश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते ॥
तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलोदकी ।
तिलस्य दाता भोक्ता च षट्तिली नावसीदति ॥
सततु षट्तिली भूत्वा सर्व्वपापैः प्रमुच्यते ।
त्रिंशद्वर्षसहस्राणि स्वर्गलोके महीयते ॥”
अथ गोविन्दद्वादशी ।
“फाल्गुने शुक्लपक्षस्य पुष्यर्क्षे द्वादशी यदि ।
गोविन्दद्वादशी नाम महापातकनाशिनी ॥”
अत्र गङ्गायां पद्मपुराणीयो मन्त्रः ।
“महापातकसंज्ञानि यानि पापानि सन्ति मे ।
गोविन्दद्वादशीं प्राप्य तानि मे हर जाह्नवि ! ॥”
इति तिथ्यादितत्त्वम् ॥
अथ द्वादशीजातफलम् ।
“बहुप्रजः सर्व्वजनानुरागी
भूपालमान्यस्त्वतिथिप्रियः स्यात् ।
चेत् द्वादशी यस्य जनस्य सूतौ
प्रवासहीनो व्यवहारदक्षः ॥”
इति कोष्ठीप्रदीपः ॥

द्वापरः, पुं, (द्वयोर्विषययोः परस्तत्पर आसक्त इत्यर्थः । पृषोदरादित्वात् साधुः ।) सन्देहः । (द्वौ सत्यत्रेतायुगौ परौ श्रेष्ठौ यस्मात् ।) युगविशेषः । इत्यमरः । ३ । ३ । १६१ ॥ तद्युगपरिमाणं यथा,—